२वके स्त्रिकाण्ड० स्त्रियां ङीप्। ३दीर्घजङ्घायुक्ते उष्ट्रादौ त्रि० कर्म०। ४दीर्घायां जङ्घायाम् स्त्री

**दीर्घजिह्व** पुंस्त्री० दीर्घा जिह्वा यस्य। १सर्पे हेमच०स्त्रियां ङीप्। २दानवभेदे पु० "गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः" भा०आ० ६५अ० ४राक्षसभेदे स्त्रियां टाप्। "द्व्यक्षीं त्र्यक्षीं ललाटाक्षीं दीर्घजिह्वामजिह्विकाम्" भा०व० २७९ अ०। ५कुमारानुचरमातृगणभेदे "जाटालिका कामचरी दीर्घजिह्वा बलोत्कटा" भा०श० ४७अ० "दीर्घजिह्वी च छन्दसि" पा०नि०पुंस्यपि ङीप् ६कक्कुरे च "अप श्वानं श्नथिष्ट न सखायो दीर्घजिह्व्यम्" ऋ० ९।१०१।१।

**दीर्घजीविन्** त्रि० दीर्घं बहुकालं जीवति जीव–णिनि। बहुकालजीविनि। "तत्र कालेन जायन्ते मानवा दीर्घजीविनः" मनुः।

**दीर्घतन्तु** पु० दीर्घास्तन्तवः स्तुतयोऽस्य। प्रभूतस्तुतिके देवादौ "दीर्घतन्तुर्बृहदुक्षा यमग्निः" ऋ० १०।६९।७ २दीर्घकालव्यापिसन्तानके। कर्म०। ३दीर्घे तन्तौ पु०।

**दीर्घतपस्** त्रि० दीर्घं बहुकालव्यापकं तपोऽस्य। १बहुकालव्यापकतपस्के २आयुर्वंश्ये नृपभेदे पु० "काश्यस्य काश्यपः पुत्रो राजा दीर्घतपास्तथा। धन्वस्तु दीर्घतपसो धन्वात् धन्वन्तरिः सुतः" हरिवं० २९ अ० आयुर्वंशोक्तौ।

**दीर्घतमस्** पु० उतथ्यर्षेः पुत्रे गुरुशापात् अन्धतां प्राप्ते ऋषिभेदे तत्कथा उतथ्यशब्दे १०७५पृ० उक्ता दृश्या "स वै दीर्घतमा नाम शापादृषिरजायत। बृहस्पतेर्बृहत्कीर्त्तेर्बृहस्पतिरिवौजसा। जात्यन्धो वेदवित् प्राज्ञः पत्नीं लेभे स विद्यया" भा०आ०१०४अ० "ऋषिर्दीर्घतमा नाम जात्यन्धो गुरुशापतः। त्वत्प्रसादाच्च चक्षुष्मांस्तेन सत्येन मोचय" हरिवं० २६३अ० "दीर्घतमा मामतेयो जजुर्वान् दशमे युगे" ऋ०१।१५८।६

**दीर्घतरु** पु० नित्यकर्म०। तालवृक्षे शब्दार्थकल्प०। २दीर्घे वृक्षमात्रे च। [शब्दमाला।

**दीर्घतिमिष** स्त्री तिम–वा किषन् नित्यकर्म०। कर्कटग्राम्

**दीर्घतुण्डा** स्त्री दीर्घं तुण्डमस्याः। १छुछुन्दर्यां भावप्र०। २दीर्घमुखयुक्ते गजादौ पुंस्त्री०। कर्म०। ३दीर्घे तुण्डे न०

**दीर्घतृण** पु० दीर्घं तृणमत्र। १पल्लिवाहे राजनि० कर्म०। २दीर्घे तृणे न०

**दीर्घदण्ड** पु०दीर्घो दण्ड इव काण्डेन। १एरण्डवृक्षे २गोरक्षां स्त्री भावप्र०गौरा०ङीष्। ३गोरक्षीवृक्षे स्त्री टाप् राजनि०।

**दीर्घदर्शिन्** पु० दीर्घं दीर्घात् वा पश्यति दृश–णिनि। १भाविकार्य्यज्ञे २पण्डिते च अमरः। ३गृध्रे पु०शब्दरत्ना०। ४भल्लूके राजनि०। ५दूरात् दर्शके त्रि०। "स हि धर्मं पुरस्कृत्य दीर्घदर्शी परं हितम्" भा०स० ४८अ० [र्यैन २ब०। २दूरवीक्षणे यन्त्रभेदे हला०

**दीर्घदृष्टि** पु०दीर्घा दृष्टिरस्य। १पण्डिते। दीर्घा दूरतो दृष्टि-

**दीर्घद्रु** पु०नित्यकर्म०। १तालवृक्षे शब्दच०कर्म्म०। २दीर्घे वृक्षे

**दीर्घद्रुम** पु० नित्यकर्म०। शाल्मलिवृक्षे (शिमुल) राजनि०।

**दीर्घनाद** पु० दीर्घो दूरगामित्वात् विस्तीर्णो नादोऽस्य क्षुभ्ना० न णत्वम्। १शङ्खे राजनि० २बहुकालस्थायिशब्दयुक्ते घण्टादौ त्रि०। कर्म्म०। ३आयते शब्दे पु०।

**दीर्घनाल** पु० दीर्घं नालं यस्य। १यावनाले हेमच० गुण्डतृणे २दीर्घरोहिषके न० राजनि०।

**दीर्घनास** त्रि०दीर्घा नासाऽस्य। १दीर्घनासिकान्विते। "वक्रघाती दीर्घनासो दद्यात् गां धवलप्रभाम्" शातातपेन तत्कर्मविपाक उक्तः। कर्म्म०। २दीर्घायां नासायां स्त्री

**दीर्घनिद्रा** स्त्री नित्यकर्म०। १मरणे कर्म०। २चिरकालव्यापिन्यां निद्रायाञ्च "अकाले बोधितो भ्राता प्रियस्वप्नो वृथा भवान्। रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः" रघुः।

**दीर्घपक्ष** पु० दीर्घौ पक्षौ यस्य। १कलिङ्कखगे शब्दच०। २दीर्घपक्षयुक्ते खगमात्रे पुंस्त्री०।

**दीर्घपटोलिका** स्त्री कुत्सिता पटली कन् कर्म०। (धुँधुल) ख्यातायां लतायाम् राजवल्लभः।

**दीर्घपत्र** पु० दीर्घं पत्रं यस्य। १राजपलाण्डौ २विष्णुकन्दे ३हरिदर्भे ४कुन्दरे ५तालवृक्षे च राजनि० ६कुपीलौ भावप्र० कप् संज्ञायां कन् वा। दीर्घपत्रक ७रक्तलशुने ८एरण्डे ९हिज्जले १०वेतसे च राजनि०। ११करीरवृक्षे शब्दच०१२जलजमधूके जटाध० १३लशुने हेमच० क्वापि अत इत्त्वम्। दीर्घपत्रिका १४श्वेतवचायां १५शालपर्ण्यां १६घृतकुमार्य्याञ्च स्त्री राजनि०।

**दीर्घपत्रा** स्त्री दीर्घं पत्रं यस्याः। १चित्रपर्णिकायां (चाकुलिया) भेदे २क्षुद्रजम्बुवृक्षे रत्नमाला ३गन्धपत्रायां ४केतक्यां ५डोरीवृक्षे च राजनि०। गौरा०ङीष् दीर्घपत्री ६पलाशीलतायां ७महाचञ्चुशाके स्त्री राजनि०।

**दीर्घपर्णी** स्त्री दीर्घं पर्णं यस्याः गौरा० ङीष्। पृश्निपर्ण्याम् राजनि०।